ॐ

Sri Sai Ram

# ॥ श्रीरुद्रप्रश्नः ॥

## śrīrudrapraśnaḥ

*Supplement*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 1 | त्र्यं॑बकं यजामहे<br>trya̍mbakaṁ yajāmahe<br>सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्<br>sug̱andhiṁ pu̍ṣṭ̱ivardha̍nam | त्र्यं॑बकं यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्।<br>trya̍mbakaṁ yajāmahe sugandhiṁ pu̍ṣṭ̱ivardha̍nam। |
| 2 | उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नात्<br>u̱rvā̱ru̱kami̍va̱ bandha̍nāt<br>मृ॒त्योर्मु॑क्षीय॒ माऽमृता᳚त्<br>mṛ̱tyormu̍kṣīya̱ mā'mṛtā̎t | उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता᳚त्॥<br>u̱rvā̱ru̱kami̍va̱ bandha̍nānmṛ̱tyormu̍kṣīya̱[3] mā'mṛtā̎t।। |

[1] *To follow the learning column, where each śloka is divided into many parts and each part is chanted twice, please refer to Sri-Rudram-Learning-Method-1-Supplement.mp3.*

[2] *To follow continuous chanting column, where the śloka is chanted without interruption and repeated once, please refer to Sri-Rudram-Learning-Method-2-Supplement.mp3 or Sri-Rudram-Learning-Method-3-Supplement.mp3 where no repetition accrues.*

[3] *Sandhi rue: t changes to n (bandhanāt mṛtyormukṣīya›* बन्धनान्मृत्योर्मुक्षीय *bandhanānmṛtyormukṣīya; jagat nātha* जगन्नाथ *jagannātha).*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 3 | यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु<br>yo ru̱dro a̱gnau yo a̱psu<br>य ओष॑धीषु॒<br>ya oṣa̍dhīṣu̱<br>यो रु॒द्रो विश्वा॒ भुव॑ना वि॒वेश॒<br>yo ru̱dro viśvā̱ bhuva̍nā vi̱veśa̱<br>तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु<br>tasmai̍ ru̱drāya̱ namo̍ astu | यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु य ओष॑धीषु॒ यो रु॒द्रो विश्वा॒ भुव॑ना वि॒वेश॒ तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॥<br>yo ru̱dro a̱gnau yo a̱psu ya oṣa̍dhīṣu̱ yo ru̱dro viśvā̱ bhuva̍nā vi̱veśa̱ tasmai̍ ru̱drāya̱ namo̍ astu\|\| |
| 4 | ये ते॑ स॒हस्र॑म॒युतं॒ पाशा॒<br>ye te̍ sa̱hasra̍ma̱yuta̱ṁ pāśā̱<br>मृ॒त्यो मर्त्या॑य॒ हन्त॑वे<br>mṛtyo̱ martyā̍ya̱ hanta̍ve | ये ते॑ स॒हस्र॑म॒युतं॒ पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे।<br>ye te̍ sa̱hasra̍ma̱yuta̱ṁ pāśā̱ mṛtyo̱ martyā̍ya̱ hanta̍ve\| |
| 5 | तान् य॒ज्ञस्य॑ मा॒यया॒<br>tān ya̱jñasya̍ mā̱yayā̱<br>सर्वा॒नव॑ यजामहे<br>sarvā̱nava̍ yajāmahe | तान् य॒ज्ञस्य॑ मा॒यया॒ सर्वा॒नव॑ यजामहे।<br>tān ya̱jñasya̍ mā̱yayā̱ sarvā̱nava̍ yajāmahe\| |
| 6 | मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा᳚<br>mṛ̱tyave̱ svāhā̍ mṛ̱tyave̱ svāhā̎ | मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा᳚॥<br>mṛ̱tyave̱ svāhā̍ mṛ̱tyave̱ svāhā̎\|\| |
| 7 | प्राणानां ग्रन्थिरसि<br>prāṇānāṁ granthirasi<br>रुद्रो मा॑ विशा॒न्तकः<br>rudro mā̍ viśā̱ntakaḥ | प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तकः।<br>prāṇānāṁ granthirasi rudro mā̍ viśā̱ntakaḥ\| |
| 8 | तेनान्नेना᳚प्याय॒स्व<br>tenānnenā̎pyāya̱sva | तेनान्नेना᳚प्याय॒स्व।<br>tenānnenā̎pyāya̱sva\| |

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 9 | नमो रुद्राय विष्णवे<br>namo rudrāya viṣṇave<br>मृत्यु॑र्मे पा॒हि<br>mṛtyu̍rme pā̱hi | नमो रुद्राय विष्णवे मृत्यु॑र्मे पा॒हि॥<br>namo rudrāya viṣṇave mṛtyu̍rme pā̱hi \| \| |
| 10 | तमु॑ ष्टु॒हि॒<br>tamu̍ ṣṭu̱hi̱<br>यः स्वि॒षुः<br>yaḥ svi̱ṣuḥ<br>सु॒धन्वा॒<br>su̱dhanvā̱<br>यो विश्व॑स्य॒<br>yo viśva̍sya̱<br>क्षय॑ति भेष॒जस्य॑<br>kṣaya̍ti bheṣa̱jasya̍ | तमु॑ ष्टु॒हि॒ यः स्वि॒षुः सु॒धन्वा॒ यो विश्व॑स्य॒ क्षय॑ति भेष॒जस्य॑।<br>tamu̍ ṣṭu̱hi̱ yaḥ svi̱ṣuḥ su̱dhanvā̱ yo viśva̍sya̱ kṣaya̍ti bheṣa̱jasya̍ \| |
| 11 | यक्ष्वा᳚म॒हे<br>yakṣvā̎ma̱he<br>सौ᳚मन॒साय॑ रु॒द्रं<br>sau̎mana̱sāya̍ ru̱draṁ<br>नमो᳚भिर्दे॒वम्<br>namo̎bhirde̱vam<br>असु॑रं दुवस्य<br>asu̍raṁ duvasya | यक्ष्वा᳚म॒हे सौ᳚मन॒साय॑ रु॒द्रं नमो᳚भिर्दे॒वमसु॑रं दुवस्य॥<br>yakṣvā̎ma̱he sau̎mana̱sāya̍ ru̱draṁ namo̎bhirde̱vamasu̍raṁ duvasya \| \| |
| 12 | अ॒यं मे॒ हस्तो॒ भग॑वान्<br>a̱yaṁ me̱ hasto̱ bhaga̍vān<br>अ॒यं मे॒ भग॑वत्तरः<br>a̱yaṁ me̱ bhaga̍vattaraḥ | अ॒यं मे॒ हस्तो॒ भग॑वान॒यं मे॒ भग॑वत्तरः।<br>a̱yaṁ me̱ hasto̱ bhaga̍vāna̱yaṁ me̱ bhaga̍vattaraḥ \| |

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 13 | अ॒यं मे॑<br>a̱yaṁ me̎<br>वि॒श्वभे॑षजो॒ऽयगं॒<br>vi̱śvabhe̎ṣajo̱'yagṁ<br>शि॒वाभि॑मर्शनः<br>ś̱ivābhi̍marśanaḥ | अ॒यं मे॑ वि॒श्वभे॑षजो॒ऽयगं॒ शि॒वाभि॑मर्शनः॥<br>a̱yaṁ me̎ vi̱śvabhe̎ṣajo̱'yagṁ ś̱ivābhi̍marśanaḥ\|\| |